©2017 IJSRST | Volume 3 | Issue 8 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
Themed Section: Science and Technology

# कवि बलभद्र गोस्वामी विरचित - सेतुबंधम् नाटक का परिचय

**मोनिका यादव**
**(JRF शोधच्छात्रा)**
**लखनऊ विश्वविद्यालय, लखनऊ**

**सेतुबन्धनाटकम्–**

नाटककारेण विरचितस्य सेतुबन्धनाटकस्य प्रकाशनतिथिः 1979 वर्षस्य 25 दिसम्बरमासे उल्लिखिता। नाटकेऽस्मिन् दशांकाः तथा 210 श्लोकाः सन्ति। अस्योपजीव्यग्रन्थः आदिकाव्यरामायणमस्ति। नाटकस्य नेता रामः तथा नायिका सीता तत्रैव प्रतिनायकरूपे रावणः विद्यमानः अस्ति। नाटके श्रीरामः भार्यया लक्ष्मणेन च सह महर्षे अगस्त्यस्य आश्रमे राक्षसेभ्यः मुनीनां रक्षार्थमागच्छति।

न केवलं वानरराक्षसानां, रामेण सेतुर्विहितः स्वधर्मे।[1]
स कर्मयोगेन बन्धसेतुं, महोदधौ मानवता–हिताय।।

तत्पश्चात् राक्षसानां स्वामिना रावणेन सूर्पणखाप्रेषिता। सूर्पणखायाः दुष्टव्यवहारत्वात् क्रुद्धलक्ष्मणेन नासिका कर्तिता। एतत् विलोक्य रावणेन पंचवटीकुटीरात् सीता अपहृता। रामः वानराणां विभीषणस्य च सहयोगेनैव रावणवधकार्यं कृतवान।

अधीतान्यपि शास्त्राणि बुद्धेर्वैदग्ध्यमेव च।[2]
अहंकारमतेः सर्वं सर्वथा निष्फल भवेत्।।

तदनन्तरं सर्वे रामेण सीताया च सह अगस्त्यमुनेराश्रमं गच्छति। समुद्रे (सगरे) सेतोः बन्धनत्वादेव नाटकस्य नामकरणं सेतुबन्धमभवत्। नाटकस्य अङीरसः वीररसः मतः। सम्पूर्णनाटके भवगतः राघवेन्द्रस्य चारिन्र्यं, भातृप्रेम उदारभावनः च कविना नाटकेऽस्मिन् प्रदर्शिताः। यस्मात् कारणात् सामाजिकेभ्यः सेतुबन्धमिदं नाटकमत्याकर्षकं प्रतीयते।

अतः चूलिकया भगवतः राघवेन्द्रस्य सुग्रीवेण सह मित्रताविधानं प्रतिपाद्यतेऽत्र।

2. **सेतुबन्धनाटकस्य कार्यावस्थाः–**

नाट्ये पंचकार्यवस्था उक्ताः। फलार्थिभिः प्रारब्धस्य कार्यस्य पंचावस्थाः भवन्ति। अत्र कार्यमित्यस्य शब्दस्य अर्थः प्रधानफलस्य प्राप्तिरस्ति।

**अवस्थाः पंच कार्यस्य प्रारब्धस्य फलार्थिभिः।**

---

1. सेतुबन्धम् – 1/5
2. सेतुबन्धम् – 4/8

**आरम्भयत्नप्राप्याशानियताप्तिफलागमाः।।**[3]

अपि च–

संसाध्ये फलयोगे तु व्यापारः कारणस्य यः,

तस्यानुपूर्व्या विज्ञेयाः पंचावस्थाः प्रयोक्तृभिः।

आरम्भश्च प्रयत्नश्च तथा फलयोगश्च पंचमः,

नियता च फलप्राप्तिः फलयोगश्च पंचमः।। [4]

कार्यस्य प्रथमा अवस्था प्रयत्नमस्ति। साहित्यदर्पणे उक्तम्–

**''भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये''**

नायके मुख्यफलास्य सिद्धये उत्सुक्तापूर्णं कृता क्रियैव आरम्भः उच्यते–

यथा– सेतुबन्धनाटकस्य प्रथमे अंके भगवान् रामः मुनीनाम् अस्थिसमूहं पश्यति तदां क्रोधाविष्टः धनुरूघम्य रक्षनायकस्य रावणस्य विनाशार्थं प्रतिजानाति–

**आर्यव्रतान् तपसि योग–समाधि–निष्ठान्, ये तापसानवधिषु विपिने निरीहान्।**

**रामोऽयमद्य मुतनिरक्तपिपासुकानां, तेषां विनाशनं–कृते कुरूते प्रतिज्ञाम्।।**[5]

भगवतारामेण मुख्यफल (रावणावनां) सूच्यते। मुख्यफलार्थम् उत्सुकतापूर्णं प्रथमा अवस्था अत्रैव प्रदर्शयते, एष आरम्भः। कविना कार्यस्य आरम्भः अत्र प्रदर्शितः यत्र राघवः रक्षकुलं नष्टुंमिच्छति प्रतिज्ञाबद्धः च भवति। अत्रतः एव रावणवधमुख्यकार्यं वर्तते।

**क. प्रयत्नम्–** नाट्यशास्त्रे प्रयत्नमुक्तम्–

**अपश्यतः फलप्राप्तिं व्यापारो यः फलं प्रति।**

**परं चौत्सुक्यगमनं स प्रयत्नः प्रकीर्तितः।।** [6]

अस्य नाटकस्य द्वितीये अंके यदा क्रुद्धः लक्ष्मणः सूर्पणखायाः नासिकाच्छेदं करोति तदा चण्डाशुं चण्डः खरः भगवन्तं राघवं हन्तुमायाति। तदा रामः दिशति–

रामः– अहो समागत एव बहुप्रतीक्षितः कालः तद् भवतु नामार्यशक्तिपरीक्षा। अनुभवन्तु नामैते मुनिरक्तपापिनो राक्षसा मदीयान् निशितशिलीमुखान्।

''आस्तां कौशलवाहिनी बलमपि क्षोणीभृता माहवे, मित्राणां रथबाजिवाहनमहद्युद्धास्त्र शस्त्राण्यपि। एकाकी विपिने यदा धृतजटाजूटोऽप्यसौ तापसो, रामोऽरातिबल प्रमाथिविशिखैः सज्यं विधत्ते धनुः।''[7]

---

3. दशरूपकम् – 119/01
4. साहित्यदर्पण – 7/6
5. सेतुबन्ध – 12/1
6. ना0शा0 – 10/19

अत्र मुख्यफलं प्राप्त्वयन्, जातवर्णपूर्वकं कृतम्। खरदूषणगिशिराः चतुर्दशसहस्त्रसैनिकाः च हत्वा रामः स्वप्रधानफलं वर्धयति। अतः अत्र प्रयत्नं कार्यवस्था वर्तते।

**ख. प्राप्त्याशा–** प्राप्त्याशालक्षणं नाट्यशास्त्रे इत्थं प्रदर्श्यते–

**ईषत्प्राप्तिर्यदा काचित्फलस्य परिकल्प्यते।**

**भावमात्रेण तं प्राहुर्विधिज्ञाः प्राप्तिसम्भवम्।।**[8]

यत्र मुख्यफलप्राप्तौ उपायेन सह अपाय अपि विद्यमानः भवति तत्रैव प्राप्त्याशा अस्ति।

यथा सेतुबन्धनाटकस्य पंचमे अंके यदा साधुवेषधारिणा रावणेन सीता हृता तदा रामस्य दशा अतिशोचनीया अभवत्। राघवः स्वक्षत्रियधर्मं प्रधानफलं त्यज्य शोकाकुलः दुःखी चाभवत्। पौनः पुन्येन हतोत्साहितः रामः अनुजं वदति यत्–

**धैर्यं प्रेरयति क्षात्रं कोदण्डं कर्त्तुमुद्यतम्।**

**सीताव्यथास्मृतिर्भूयः शान्तं मथ्नाति मानसम्।।**[9]

अत्र भगवतः रामस्य प्रधानफलं (रावणवधं) प्रति उदासीनता दृश्यते पपंच सः क्षत्रियधर्ममपि स्मरति, येन उपायापायाभ्यां अवस्थेयं प्राप्त्याशा अस्ति।

**ग. नियताप्ति–** नाट्यशास्त्र नियताप्तिः लक्षणां यथा दीयते–

**नियता तु फलप्राप्तिं यदस भावेन पश्यति।**

**नियतां तां फलप्राप्तिं सगुणां परिचक्षते।।**[10]

अपायाभावानन्तरं यदा निश्चितफलप्राप्तिः स्पष्टरूपेण प्रतीयते तदा सा अवस्था निपयताप्तिः कथ्यते–

नाटकस्य नवमे अंके सुग्रीवः हनुमान् च भगवन्तं रामं सूचयतः–लंकेशस्य भ्राता विभीषणः अस्माकं सहायकः भूत्वा आगतवान् यस्मात् कारणात् सेतुबन्धनकार्यम् इदानीमसम्भ्यावं नास्ति–

**सुग्रीवः–** अनेन विभीषणागमनेन सिद्धमस्माकं महत् कूटकार्यम्। यतो रहस्यमयीयं लंका विगतावगुण्ठना भविष्यति।

**जाम्बवान्–** महोदय! न केवलमेतदेव अन्यदपि।

**यतः–**

**छित्रबाहुरभदेष रावणो भ्रातृवंचितः।**

**भविता रामबाणस्य प्रचण्डज्वलेन हविः।।** [11]

---

7. सेतुबन्ध – 12/2
8. ना0शा0 – 11/19
9. सेतुबन्ध – 12/2
10. नाट्यशास्त्र – 12

**घ.** **नियताप्तिः–**

लंका येन समुद्रणेन आावृता अस्ति। यस्मिन् सागरे सेतुबन्धमत्यन्तमावश्यकमस्ति। स्वभ्रातरं रावणं त्यक्त्वा आगतः विभीषणः सेतुबन्धने सहायकः अभवत्।

अतः मुख्यफलप्राप्ति अधुना निश्चितैवास्ति, अतः नियताप्ति अवस्था अत्र वर्तते।

**ङ.** **फलागमः–** नाट्यशास्त्रस्य एकोविंशाध्याये फलयोगविषये कथ्यते–

**अभिप्रेतं समग्रं च प्रतिरूपं क्रियाफल्।**

**इतिवृत्ते भवेद्यस्मिन् फलयोगः प्रकीर्तितः।।**

यत्र इतिवृत्ते नायकः अभीष्टक्रियाफलं प्राप्नोति, फलयोगः (फलागमः) कथ्यते सेतुबन्धनाकस्य दशमे अंके नायकेन रामेण लंकेश्वरं हतः, रावणवधः नायकस्य अभिप्रेतफलमस्ति। फलागमसूचना त्रिजटां सीतां बाधयति।

**ज्वलयत्रिव दिग्भागान्, प्रस्फुटत्रशनिर्यथा।**

**विभिन्दन् निर्गतो बाणः, पातयन् राक्षसेश्वरम्।।**

ताक्देव नेपथ्ये हनुमान् कथयति– क्वासि मातः! क्व मतासि–

**पूर्णप्रतिज्ञो रघुनन्दनोऽसौ, हतो रणे रावणराक्षसेन्द्रः।**

**तदाज्ञज्ञानेतुमितो हनूमान्, सीतामहं सादरमागतोऽस्मि।।**

अतः अत्र रामेण स्वप्रतिज्ञा पूर्णा कृता यः नायकस्य नाटकस्य च मुख्यफलमस्ति। अतः एव अवस्थेयं फलागम् अस्ति।

**सैरन्ध्रीनाटकस्य कार्यावस्थाः**

**कार्यावस्थाः–**

सैरन्ध्रीनाटकस्य प्रारम्भोऽपि प्रतिशोधज्वालायं प्रज्वज्यन्त्यास्तस्या एव पांचाल्या विस्फोटकवाक्यैरेव सम्पद्यते। यतोहि वनवासस्यान्तिमो वत्सरोऽज्ञातरूपेण भोक्तव्य आसीत्।

---

[11]. सेतुबन्ध नाटक –